International Journal of Sanskrit Research 2022; 8(3): 284-286

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(3): 284-286
© 2022 IJSR
www.anantaajournal.com
Received: 09-03-2022
Accepted: 24-04-2022

**शबरीश एम्**
शोधप्रबन्ध छात्रः एस्. सि. एस्. वि.एम्.वि (श्री चन्द्रशेखरेन्द्र सरस्विति विश्वमहाविद्यालयः)
एनात्तूर् काञ्चीपुरम्
तमिल् नाटु, भारत

**Corresponding Author:**
**शबरीश एम्**
शोधप्रबन्ध छात्रः एस्. सि. एस्. वि.एम्.वि (श्री चन्द्रशेखरेन्द्र सरस्विति विश्वमहाविद्यालयः)
एनात्तूर् काञ्चीपुरम्
तमिल् नाटु, भारत

# केरलीयसंस्कृतमहाकाव्येषु चरित्रप्रतिपादनम्

**शबरीश एम्**

## प्रस्तावना

काव्यं गद्यपद्यमयं कविकर्म तथा हितोपदेशदायकम् इत्यतः सर्वानपेक्ष्य उत्कृष्टमिति पण्डितमतम्। तथा काव्यमधिकृत्य प्रसिद्धमेकं कथनमप्यस्ति- ‘’सकलविद्यास्थानैकायतनं पञ्चदशं काव्यं विद्यास्थानम्‘’ इति।

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।

करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम् ।। इत्यस्ति भामहमते काव्यलक्षणम्। इष्टार्थव्यवच्छिन्ना पदावली काव्यम् इति आचार्यदण्डिना, रमणीयार्थप्रतिपादकः शब्दः काव्यम् इति जगन्नाथपण्डितेन तथा वाक्यं रसात्मकं काव्यम् इति विश्वनाथकविराजेन च उक्तानि काव्यलक्षणानि श्रद्धेयानि एव । तदेवकाव्यं विविधाभिः सविशेषताभिः महाकाव्यत्वं प्राप्नोति। सर्गबन्धो महाकाव्यमुच्यते इति भवति महाकाव्यलक्षणम्। तत्र काव्यस्य इतिवृत्तं, नायकः, प्रयोजनं, प्रतिपाद्यविषयाः, प्रकृतिवर्णना, युद्धवर्णना, इत्यादयः प्रधानाः भवन्ति।तथैव रसभावसंपुष्टता सर्गाणां परस्परबन्धित्वं, कथानां क्रमानुगतिकत्वं, वृत्तालङ्काराणां सहयोगित्वम् इत्यदीनि च अविभाज्यानि भवन्ति।एतादृशानि महाकाव्यानि लोकरञ्जकानि युगान्तरस्थायीनि च भवन्ति।

काव्यानां विभागेषु प्रधानानि भवन्ति चरित्रमहाकाव्यानि। महाकाव्यलक्षणानुसारं वर्णनाभिः साकं चरित्रपराणां वर्णनानां सहयोगित्वात् महाकाव्यानि चरित्रमहाकाव्यमिति सविशेषतां प्राप्नोति।देश-काल-सामाजिक-राज्यनैतिकप्रतिपादनैः साकं जीवनचरितसम्बद्धानि कार्याण्यपि प्रतिपादयति चेत् तानि जीवनचरितमहाकाव्यमिति गण्यन्ते। तादृशानि महाकाव्यान्यपि संस्कृते बहूनि सन्ति। शिवविलासः, उदयवर्मचरितं, विश्वभानुः, क्रिस्तुभागवतम्, विशाखविजयः, श्रीनारायणविजयः

इत्यादीनि च तत्रान्तर्भवन्ति। विस्तृतिभयात् तानि विहाय चरित्रमहाकाव्यानामेव प्रतिपादनम् अत्र क्रियते। प्रधानानि केरलीयचरित्रमहाकाव्यनि भवन्ति मूषिकवंशम्, केरलोदयः, आङ्गलसाम्राज्यं, नवभारतम् इत्यादीनि ।

अत्र उपर्युक्तानां चतुर्णां केरलीयचरित्रमहाकाव्यानां वर्णनापराणि रचनाप्रकाराणि, आस्वाद्यपराणि परामर्शानि प्रतिपाद्यन्ते। प्रतिपाद्यविषयान्, शैलीभेदान्, वृत्तालङ्कारादीन् चाधिकृत्य दिङ्मात्रपरिचयं करोम्यत्र।मूषिकवंशं नामके काव्ये कस्यचन राजवंशस्य तथा प्रदेशस्य वा प्रादेशिकं चरितं वर्ण्यते। एवं केरलोदये केरलराज्यस्य ऐतिहासिकं चरित्रपरं च चरितं वर्ण्यते ।तथैव भारतराष्ट्रे बहुकालं यावत् शासनं कुर्वताम् आङ्गलभरणाधिकारिणां समग्रं चरितं वर्ण्यते। अन्तिमे नवभारतं नामके काव्ये स्वातन्त्र्यान्तोलनादारभ्य जवहर्लाल् नहरोः प्रधानमन्त्रिपदारोहणपर्यन्तं चरितं वर्ण्यते। अर्थात् प्रादेशिकशासन-राजस्तरीयशासन-साम्राज्यत्वशासन – स्वातन्त्र्यसमर - जनायत्तशासनपरान् विषयान् काव्येष्येषु क्रमेण प्रतिपादयन्ति।

## मूषिकवंशम्

प्राचीनकेरलचरितपरामर्शप्रधानं तथा कोलोत् नाट् राजवंशानां अपदानप्रधानं संस्कृतचरित्रकाव्यं भवति अतुलकविना विरचितं मूषिकवंशम्। अपूर्णेऽस्मिन् काव्ये 1058 श्लोकाः एव एतावता उपलब्धाः। राजधर्म इति विख्यातस्य कोलोत्तिरिराजस्य श्रीकण्ठस्य शासनमेवात्र प्रतिपाद्यविषयः। पुराणम्, ऐतिह्यं, वंशावली, काव्यगुणम् इत्यादिभिः सम्मिश्रा भवतीयं कृतिः। परशुरामस्याक्रमणकाले महिष्मतीराज्ये विद्यमानां जीवत्योगोद्युक्ताम् एकां गर्भिणीं राणीं रक्षितुं पुरोहितेन कृतं समाश्वासवचनं प्रतिपाद्य काव्यमिदमारभते। मूषिकराजवंशस्य स्थापनं, 95 राज्ञां चरितं च काव्येऽस्मिन् प्रतिपादयति। उग्रः इति राज्ञः चरितादरभ्य कुञ्चिवर्मापर्यन्तानां 59 मूषिकराजानां चरितं चात्र दृश्यते। उत्तकरेरलस्थाः नद्यः, देवालयाः, नगराणि, जनपदानि, च अत्र वर्ण्यन्ते। रामघटमूषिकेति प्रथमराजस्य शासनादारभ्य श्रीकण्ठपर्यन्तानां 115 राज्ञां राज्यपालनं मूषिकवंशे दृश्यन्ते। अतुलकवेः काव्यभावना वर्णनानैपुणी, सौन्दर्यसङ्कल्पःच मूषिकवंशपठनात् अवगन्तुं शक्यन्ते। अत्रत्यः एकादशः सर्गः अनुष्टुप्प् वृत्तनिबद्धः भवति ।

## केरलोदयम् ।

संघकालादारभ्य (केरलं तमिल्नाट्ु च मिलित्वा स्थितः कालः) ऐक्यकेरलरूपीकरणपर्यन्तं केरलचरित्रमाश्रित्य डा. के. एन्. एषुत्तच्चन् महाशयेन विरचितं महाकाव्यं भवति इदम्। प्रायः द्विसहस्रसंवत्सरस्य केरलचरितम् अस्मिन् काव्ये दृश्यते। **21** सर्गात्मके अस्मिन् काव्ये **2500** श्लोकाः सन्ति। इदं काव्यं स्वप्नमञ्जरी, स्मृतिमञ्जरी, ऐतिह्यमञ्जरी, बोधमञ्जरी, चरित्रमञ्जरी इत्येवं पञ्चविभागेषु विभक्तानि। परशुरामेण सम्बद्धां केरलोत्पत्तिरूपाम् ऐतिह्यकथां, संघकालप्रशासकानां चोलराजानां तेषां शासनरीतीः, आर्यवंशीयानाम् अधिनिवेशं तत्संबद्धानि ऐतिह्यानि, सामूतिरिवंशीयानां शासनरीतीः, पोर्चुगीस् देशीयानाम् आगमनं तेषां सामाजिकपरिवर्तनम्, ऐक्यकेरलरूपीकरणपर्यन्तं चरितं, केरलराजानाम् तथा यूरोप्पीयानां मध्ये संजातं संघट्टनं, भारतस्य स्वतन्त्रतासंग्रामस्य विवरणानि च अत्र द्रष्टुं शाक्यन्ते।

## आङ्गलसाम्राज्यम्

ए. आर्. राजराजवर्मा महाशयेन विरचितः महाकाव्यलक्षणसम्पन्नोऽयं ग्रन्थः भारतस्य पूर्वकालचरितप्रतिपादकः भवति। यदा आङ्गलशासकाः भारतं प्रविश्य विविधतन्त्राण्युपयुज्य स्वस्वाधीनं प्रवर्धयन् भारतदेशे शासनं कर्तुम् आरभन्त। इतिहासमाधारीकृत्य विरचितोऽयं ग्रन्थः। अस्मिन् ग्रन्थे विद्यमानाः 1910 शलोकाः 23 सर्गेषु विभक्तं भवति। काव्यस्य आरम्भे विश्वप्रसिद्धस्य लण्डन् नगरस्य वर्णनं दृश्यते। काव्यमिदं विक्टोरिया नगरस्य वज्रजयन्तिमहोत्सवमधिकृत्य 1857 तमे वर्षे विक्टोरिया राण्या कृतघोषणेन परिसमाप्यते। कथायाः मुख्यविषयः भारते आङ्कलशासकानां साम्राज्यरूपीकरणमेव। मुगल्-पोर्चुगीस्-डच्च्-

आङ्गलेयशासकानाम् आक्रमणम्-आधिपत्यं, महाराष्ट्रा, मैसूर्, तिरुवितांकूर्, कोल्कत्ता, डल्हि प्रदेशेषु वैदेशिकाधिपत्यं, गवर्णर् जनर् शासनरीतिः, शासनेषु आङ्गलेय राण्योः नियन्त्रणं, भारतीयशासकानां प्रतिरोधः, अधीशत्वं स्थापितानां राज्ञां शासनरीतिः, नगरविकासः, रेल्यानस्य आरंभः, पत्रालयकार्यालयानाम् आरम्भः, आङ्गलेयविद्याभ्यासस्य प्रचारः, च प्राधान्येन अस्मिन् काव्ये प्रतिपादयन्ति। यथावसरं प्रकृतिवर्णना अस्य काव्यस्य सविशेषता भवति। अलङ्कारवृत्तनिबद्धं काव्यमिदं कवेः भाषावैदग्ध्यं चरित्रावगाहं च प्रकटयति।

**नवभारतम्**

मुतुकुलं श्रीधरेण विरचिते अष्टादशासर्गात्मकेऽस्मिन् महाकाव्ये भारतस्य आधुनिकचरित्रस्य विवरणं दृश्यते। विभिन्नवृत्तेषु निबद्धाः 1300 श्लोकाः अस्मिन् काव्ये विद्यन्ते। स्वातन्त्र्यान्तोलनं मुख्यप्रतिपाद्यविषयः भवति। मोतिलाल् नेहरु, जवहर्लाल् नेहरु, सुभाष् चन्द्रबोस्, महात्मागान्धिप्रभृतीनां महात्मनां स्वातन्त्र्यसंग्रामयोगदानानि सविस्तरं प्रतिपादयन्ति । अस्मिन् काव्ये हिमालयादारभ्य केरलपर्यन्तं विद्यमानानां भूमिशास्त्रपराणां विषयानां, सांस्कृतिककेन्द्रानां, देवालयानाम्, उत्सवानां च विवरणं दृश्यते। अस्मिन् काव्ये हिमालयः भूमेः मध्यभागे पवित्रतायाः सन्देशावाहकरूपेण तिष्ठतीति कविः वर्णयति। प्राचीनभारतीयकवीनां वर्णनापि अत्र दृश्यते । वैदेशिकाक्रमणं भारतस्य दयनीयावस्थां च अत्र प्रस्तौति। जवहर्लाल् नेहरोः प्रधानमन्त्रिपदारोहणेन काव्यमिदं परिसमाप्यते। 1978 तमे वर्षे इदं महाकाव्यं प्रसिद्धीकृतम्।

चरित्रमहाकाव्यानां पठनेन युगपदेव काव्यास्वादनं चरित्रावबोधं च सिद्ध्यति। काव्यानां चरित्र-आस्वादन-सामाजिकदीनां विषयाणामाधारेणैव अत्र विवरणं कृतम्। एवमेव भाषाशैली - पदप्रयोगचातुरी –आशयतीव्रता इत्याद्यनेकाः सविशेषताः आधारीकृत्यापि पठनं पाठनं च अवश्यं करणीयम्। तदर्थम् उत्साहः प्रोत्साहनं च भवेत् ।

**साहायग्रन्थसूची**

1. केरलीयसंस्कृतसाहित्यचरित्रं -वटक्कुंकूर्
2. केरलसहित्यचरित्रं -उल्लूर्
3. केरलचरित्रं -ए. श्रीधरमेनोन्।